# संस्कृत-भवितव्यम्

● निरन्तरं सप्तषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

वर्षम् ६८, अङ्कः ११
शनि. दि. २ जून २०१८,
ज्येष्ठ कृ. ४
शके १९४०, युगाब्द ५१२०

13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/- | PRINTED MATTER | वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57

डाकप्रेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9



संस्थापक-सम्पादक:
स्व. डॉ. श्री. भा. वर्णेकर

प्रधान-सम्पादिका
डॉ. लीना रस्तोगी

सम्पादिका
डॉ. वीणा गानु

सहसंपादिकाद्वयम्
डॉ. शारदा गाडगे, डॉ. रेणुका करन्दीकर

प्रबन्धक: - श्री. रवीन्द्रः संगवई (मो.क्र. ९४२२१०४६८५)


## वार्ता:

■ **संस्कृत-पत्रकारिता दिवसः** प्रतिवर्षं १ जूनदिनाङ्के संस्कृतभाषाविश्वे आमन्यते। ईसवीये १८६६ तमे वर्षे अस्मिन्नेव दिने काशीविद्यासुधानिधिः नामकं पण्डित उपाख्यं मुद्रितं संस्कृतमासपत्रं काशीक्षेत्रे प्रारब्धम्!

■ **फुण्डकरपाण्डुरङ्गः** महाराष्ट्रस्य कृषिमंत्री गुरुवासरे ३१ मे-दिनाङ्के हृद्घातेन पञ्चत्वं गतः!

■ **पूर्वराष्ट्रपतिः प्रणवमुखर्जी** गुरुवासरे ७ जूनदिने नागपुरे राष्ट्रिय-स्वयंसेवक-सङ्घस्य शिक्षावर्गस्य समापनसमारोहे प्रमुखातिथिः भविता। महोदयस्य भाषणविषये औत्सुक्यं सर्वत्र वरीवर्तते!



■ **रामटेकनगरे भाषा-प्रबोधन-वर्गः** विदर्भ-संस्कृत-भारती अचिरादेव मेमासे रामटेकनगरे भाषा-प्रबोधन-वर्गं समायोजितवती। वर्गेऽस्मिन् पञ्चाशताधिकाः प्रशिक्षणार्थिनः सोत्साहं सहभागिनः अभवन्। **श्री. दिलीपसेनाडवर्यः** वर्गस्यास्य सर्वाधिकारी आसीत्, **डॉ. सौ. कल्याणी काळे, डॉ. सौ. विभा क्षीरसागरवर्या, डॉ. विजय मेननः, श्री. श्रीनिवास-वर्णेकरः, श्रीश देवपुजारी, शिरीष भेडसगावकर प्रभृतयः** मार्गदर्शनं कृतवन्तः। समापन-समारोहे कालिदास-संस्कृत-विद्यापीठस्य कुलगुरुः **डॉ. श्रीनिवास-वरखेडी**-महोदयः प्रमुखातिथिः आसीत्!



■ **संस्कृतभारत्याः दक्षिणवङ्गस्य १२-दिवसीयः आवासीय-प्रशिक्षणवर्गः** उत्तर २४ परगणास्थे हालिसहरे आसाम-वङ्गीयसारस्वतमठे समारब्धः। वर्गस्य उद्घाटनं कृतवन्तः मठस्य महन्तमहाराजाः **स्वामिज्ञानानन्दाः**। इमे स्वामिनः संस्कृतेनैव स्ववचोभिः वर्गार्थिनाम् उत्साहं वर्धितवन्तः। उद्घाटनसत्रस्य विशिष्टातिथिः नरेन्द्रपुर-रामकृष्णमिशन-आवासीय-महाविद्यालयस्य संस्कृतविभागाध्यक्षः **श्रीनारायणदाशः** आसीत्। स्वागतं वर्गपरिचयश्च कारितवान् संस्कृतभारत्याः दक्षिणवङ्गस्य प्रान्तमन्त्री **श्रीस्वपनविश्वासः**। **श्रीसुनीलकान्ति-चौधरी** वर्गाधिकारिरूपेण मार्गदर्शनं करोति। वर्गस्य प्रेरकः अस्ति दक्षिणवङ्गस्य प्रान्तसङ्घटनमन्त्री **श्रीप्रणवानन्दः**। कार्यक्रमस्य सञ्चालनं कृतवान् **अङ्कनघोषः**। प्रान्तस्य सर्वेभ्योऽपि जनपदेभ्यः आहत्य १२५ वर्गार्थिनः सोत्साहं भागं स्वीकुर्वन्ति। वर्गे प्रशिक्षणप्रमुखः अस्ति **कमलाकान्तः**। व्यवस्थाप्रमुखः अस्ति **साधनदेवनाथः**।



सर्वेभ्य: मित्रेभ्य: नमांसि। संस्कृतसम्भाषणान्दोलनम् इति साधनेन राष्ट्रनवनिर्माणम् इति अस्माकं साध्यम् इति वयं जानीम:। भारतस्य ६,४०,००० ग्रामपर्यन्तमेतदान्दोलनं भवेत् इति दूरस्थं लक्ष्यम्। तदर्थं संस्कृतभारती सङ्घटननिर्माणम् इति समीपस्थं लक्ष्यम्। सद्य एतद् कार्यं प्रचलति। इतोऽपि एतस्य कार्यस्य गतिवेग: करणीय:। तदर्थं अभिप्राय:, निर्देशाश्च अस्मिन् गणे लिखन्तु। तेन सह एतस्मिन् ईश्वरीये कार्य भवन्त:/भवत्य: कथं सहकार्यं कर्तुं शक्नुवन्ति इति कृपया सूचयन्तु। धन्यवादा:। संस्कृतं वद अत्याधुनिको भव।

भवदीय:
प्रा. विजयकुमार:
प्रान्तमन्त्री, संस्कृतभारती


प्रकाशक:
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिमः उच्च-न्यायालय-मार्गः,
नागपुरम् - ४४० ००१.
www.sanskritbps.org

CORE BANKING FACILITY :
Bank : SBI, Dharampeth, Nagpur
Name : Sanskrit Bhasha Pracharini Sabha
A/c No. : 30362855441
IFSC/CIF Code : SBIN0004872

*तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।*
*ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥*

पर्यावरणदिनमनुलक्ष्य –
**सम्पादकीयम्**

# मोक्षकाष्ठं – मृत्योरनन्तरमपि पर्यावरणरक्षणम्!



मृत्युविषयिकी अथवा मृत्युसम्बन्धिनी वार्ता प्रायः संवादेषु न कस्मैचिदपि रोचते। यद्यपि 'मरणं प्रकृतिः शरीरिणाम् तथापि प्रेतस्य अन्त्यसंस्कारः तु प्रकृतिनाशकः इति सत्यम्। अस्माकं देशे प्रायः मृतस्य अन्त्यसंस्कारः चितायां क्रियते। चितायाः कृते काष्ठानाम् आवश्यकता वर्तते। एकस्य देहस्य दहनार्थं ३२० कि.ग्रा. यावत् काष्ठम् अपेक्ष्यते। गणनां कुर्वन्तु जनाः प्रतिनगरं, प्रतिग्रामं, प्रतिदिनं, प्रतिवर्षं कियत् काष्ठम् अपेक्ष्यते इति। कति वृक्षाः तदर्थं नाश्यन्ते इति चिन्तनस्य चिन्तायाश्च विषयः। एकतः पर्यावरणरक्षणस्य विचारः अन्यत्र पर्यावरण-रक्षकाणां विनाशः इति विरोधः।

अनेनैव विचारेण अस्वस्थमनाः कश्चन नागपुरस्थः युवकः किं कर्तुं शक्यते अस्मिन् विषये इति चिन्तयितुमारेभे। **विजयलिमये** इति तस्य नाम। तदर्थं वाचनम्, चर्चा, निरीक्षणम् इत्यादिभिः मार्गैः तेन उपायचिन्तनं प्रारब्धम्। तदा तेन कुतश्चित् ज्ञातं यद् पुरा चितार्थे गोमयेष्टिका (शुभागोवरी) उपयुज्यते स्म। तदनन्तरं वृक्षाणां वैपुल्येन काष्ठोपयोगः आरब्धः इति। तदनुसृत्य तेन प्रयोगः कृतः गोमयेष्टिकानां चितायाः। ६०० गोमयेष्टिकाः विरचय्य चिता रच्यते। अस्य प्रचारः तेन कृतः तथापि अस्य प्रयोगस्यापि काचित् मर्यादा विद्यते। न सर्वत्र तादृशेन वैपुल्येन गोमयखण्डाः प्राप्यन्ते। अतः पुनः पर्यायस्य अन्वेषणमारब्धम्।

विचारं विचारं, दर्शं दर्शं सः ज्ञातवान् यद् निर्माणीषु बाष्पपात्रार्थे (Boiler) काश्चन विशिष्टाः इष्टिकाः उपयुज्यन्ते इति। क्षेत्रेषु पर्णानि सन्ति, सस्योत्पादनानन्तरं अवशिष्टं वर्तते, तृणमस्ति। तत्सर्वं गोमयखण्डैः सह मिश्रयित्वा इष्टिकाः क्रियन्ते। ताः एव इष्टिकाः चितार्थे अपि उपयोक्तुं शक्यन्ते इति तेन मनसि कृतम्। तादृशः प्रचारः तेन आरब्धः। शनैः शनैः महाराष्ट्रस्य नागपुर, साङ्गली, नाशिक आदिनगरेषु तस्य प्रयासः एष भूरि प्रशंसितः। जनैः स्वीकृतः च। २०१७ तमे वर्षे स्वातन्त्र्यदिने प्रधानमन्त्रिणा श्री. नरेन्द्र मोदिना स्वीये भाषणे रक्तदुर्गतः (लालकिलातः) तस्य प्रयासः एषः उच्चैः अभिनन्दितः जनाश्च तमनुसर्तुं प्रेरिताः।

वस्तुतः काष्ठैः विरचितायां चितायां दहनप्रथा बहुकाल-प्रचलिता। अतः जनाः तस्याः पर्यायं न स्वीकुर्वन्ति। ये केचन आधुनिकविचारान् अनुसरन्ति ते खनिजतैलदाहिनीं, विद्युद्-दाहिनीं पुरस्कुर्वन्ति। परम् अद्यापि विरलाः एते जनाः। जनानां कृते भावनाभिः निगडितः एषः विषयः। सहसा नैव त्यज्यन्ते प्राचीनप्रथाः जनैः। पुरा सतीप्रथायाः उन्मूलनविषयेऽपि नैकैः समाजधुरीणैः वारं वारं सङ्घर्षः कृतः।

सम्प्रति तु अन्या एव समस्या उद्भूता वर्तते। 'फेसबुक', 'व्हॉट्सएप' इत्यादिभिः जनमाध्यमैः (Social Media) भारतीयेषु प्रसृतानां तथाकथितानां कुप्रथानां विषये, हिन्दूनां पर्वणां विषये भिन्नभिन्नाः सन्देशाः प्रसार्यन्ते। तस्य प्रतिक्रिया-रूपेण सर्वे नूतन-विचारा हिन्दुविरोधिनः इति मत्वा धिक्क्रियन्ते।

अतः मोक्षकाष्ठानां प्रचारः इति तावद् गम्भीरः अप्रियश्च विषयः। वस्तुतः एतानि मोक्ष-काष्ठानि काष्ठानां पर्यायरूपेण अतीव उपकारकाणि सन्ति। एतेषाम् उपयोगेन वृक्षाणां वृक्षनं न्यूनायेत, कृषिक्षेत्राणाम् अनुपयुक्तः अवकरः (यः प्रायः कृषकैः दह्यते एव) उपयुक्ततां वहेत्। कृषकाः स्वल्पाल्पं धनं लभेयुः। केचन युवकाः अपि वृत्तिम् प्राप्नुयुः। मृतदेहस्य दहनम् इति प्रथा अपि न नश्येत्। तथापि, परम्पराप्रियाः जनाः सत्वरं, शीघ्रं नूतनान् विचारान् न स्वीकुर्वन्ति, न च नवाः प्रथाः अवलम्बन्ते। समाजस्य विचारधारां परिवर्तयितुं समयः अपेक्ष्यते।

एवं सत्यपि, 'पुराणमित्येव न साधु सर्वं न चापि सर्वं नवमित्यवद्यम्' इति मत्वा प्रायः भारतीयाः आधुनिकान् विचारान् अङ्गीकुर्वन्ति इति द्रष्टुं शक्यते। भारतीयां संस्कृतिं पालयित्वा रक्षित्वाऽपि दोषान् हातुं समाजः सदैव सिद्धः भवति। तद्वद् अस्मिन् विषयेऽपि धुरीणाः मोक्षकाष्ठस्य स्वीकारं कुर्वन्ति चेद् अन्येऽपि जनाः तान् अनुसरिष्यन्ति एव।

नागपुरे मोक्षकाष्ठानामुपयोगस्य प्रारम्भः अभवत्। सम्प्रति महाराष्ट्रस्य अन्येषु नगरेषु अपि अस्य प्रचारः प्रसारः आरब्धः। तद्वदेव अन्येषु राज्येषु अपि पर्यावरणानुकूलः एषः प्रयोगः यशः आप्नोतु इति कामयामहे अस्मिन् पर्यावरण-सप्ताहे।

इति शम्।

● डॉ. वीणा गानु

*जूनमासस्य पञ्चम-दिनाङ्कः प्रतिवर्षं 'पर्यावरणदिनम्' इति जगति सर्वत्र अनुष्ठीयते। तं दिवसमनुसृत्य सामाजिकपर्यावरण-संशुद्धिविषयकस्य प्राप्तप्रथमपुरस्कारस्य एतस्य मराठीलेखस्य संस्कृतानुवादः अत्र प्रकाश्यते। - **सम्पादकमण्डलम्***

# पारिवारिकसम्बन्धेषु असन्तोषः - निराकरणस्य उपायाश्च

आधुनिकं युगं स्पर्धात्मकं गतिमयं च। धनप्राप्तिः एव जीवनस्य प्रमुखं ध्येयम्। धनमेव सुखप्राप्तेः साधनमिति सर्वे चिन्तयन्ति। अन्यच्च व्यक्तिस्वातन्त्र्यस्य उद्घोषः तस्य च अतिरेकः इति कौटुम्बिकस्य असन्तोषस्य महत्त्वपूर्णानि कारणानि। काभिश्चित् अवाञ्छिताभिः कल्पनाभिः जनमनः प्रभावितमिति दृश्यते।

कुटुम्बस्वास्थ्यस्य कृते प्रायशः अनेकाः स्त्रियः सर्वदा प्रयतन्ते। अधुना यानि कानि संयुक्तानि कुटुम्बानि दृश्यन्ते तथा च आरोग्यपूर्णं वातावरणं अनुभूयते तस्य कारणं तु स्त्रियः एव। अत्र पुरुषाणां सहभागः अस्त्येव किन्तु निरपेक्षं प्रेम, वात्सल्यं, परिवारं प्रति समर्पणभावना इति गुणाः स्त्रीषु सहजतया दृश्यन्ते। एतेषां गुणानां सङ्क्रमणं दुहितुः मनसि अवश्यमेव कर्तव्यमिति मातुः कर्तव्यम्।

अस्मिन् स्पर्धात्मके युगे युवतयः अपि न कुत्रापि न्यूनाः क्षमतायाम्। किन्तु एताः सर्वाः बुद्धिमत्यः कार्यकुशलाः कर्तव्य-परायणाः अपि युवतयः विवाहपराङ्मुख्यः दृश्यन्ते। यदि ताः विवाहाय उत्सुकाः तथापि अविभक्तकुटुम्बं नेच्छन्ति। युवत्यः तथैव तासां पालकाः अपि ज्येष्ठानामुपस्थितिं नेच्छन्ति। प्राचीन-कालतः भारतवर्षे कन्या जनधनसमृद्धाय वराय देया इति विचारनिष्ठा परम्परा आसीत्। वटवृक्षः इव शाखादिभिः समृद्धः परिवारः सर्वेषां कृते आधारः भवति इति तत्कालीना विचारधारणा।

अनन्तरं तु अस्माकं मातुः कालः। गृहे सदस्यानां सङ्ख्या न्यूना अभवत् किन्तु प्रेमसम्बन्धाः तु सुदृढाः। सर्वेषां सम्बन्धिनां परस्परं गमनागमनम् आनन्ददायि आसीत्। विगतेषु वर्षेषु युवतयः स्वयंपूर्णा अभवन्। तस्मिन्नेव काले स्त्रीस्वातन्त्र्यस्य उद्घोषः अभवत्। वयं युवभ्यः किञ्चिदपि तथा कस्मिन्नपि क्षेत्रे न्यूनाः न स्मः इति विचारः दृढमूलः अभवत्। तस्मात् समाजे यूनां यत् स्थानं तदेव अस्माकमिति युवतीनां सिद्धान्तः। अत्र सारासारविचारः नास्ति। प्रकृत्यैव उभयोः रचना कार्यं च परस्परपूरकम्। सर्वविषयेषु स्पर्धा तु अनिष्टैव।

एतादृशानामयोग्यानां विचाराणां प्रतिबिम्बं समाजे सर्वत्र दृश्यते। परिवाराः सङ्कटग्रस्ताः। सौख्यं धनोपभोगाश्रितमिति सङ्कल्पना वृद्धिङ्गता। किन्तु परिवारं प्रति विश्वासः, प्रेम, आत्मीयता नास्ति चेत् सौख्यं शशविषाणवत् एव।

विश्वासः प्रेम ममतेति स्त्रियः सहजाः गुणाः। पारिवारिकानां सम्बन्धानां सुदृढता तया लीलया साध्यते। अतः तस्याः कार्यस्य महत्त्वं सर्वैः अपि च गृहस्थस्य सहभागोऽपि तावानेव महत्त्वपूर्णः आवश्यकश्च। अस्माकं संस्कृतौ अर्धनारी-नटेश्वरस्य सङ्कल्पना परस्पराणां सहयोगेन दाम्पत्यजीवनस्य सफलतायाः एव प्रतीकम्। शिवशक्त्योः सम्पृक्तत्वं परस्परपूरकं विद्यते चेत् प्रपञ्चः सुफलः भवेत्।

अधुना वयं सर्वेऽपि युवानः युवत्यश्च अनुभवेन ज्ञातुं शक्नुमः यत् धनं महत्त्वपूर्णं नास्ति अपि तु पारिवारिकसम्बन्धाः एव महत्त्वपूर्णाः। किन्तु तत्र कतिपये अवरोधाः। तेषां निवारणं सुशकम्।

कण्वमुनिना अभिज्ञानशाकुन्तलम् इत्यत्र यत् उपदिष्टं तत् महत्त्वपूर्णमेव वर्तते। विवाहानन्तरं यदा कन्या पतिगृहं गच्छति तदा कथं व्यवहरेत् सा इति पित्रा कण्वमुनिना मातृवात्सल्येन एव उदीरितम्। एषः उपदेशस्तु सार्वकालिकः।

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**
**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याधयः॥**

अस्मिन् श्लोके यः उपदेशः अस्ति तस्य मथितार्थः तु ग्रहणीयः। अधुना सपत्न्यः न सन्ति। किन्तु ननान्दारः, यातारः, विशेषतया पत्युः सखीभिः सह प्रेमसम्बन्धाः वर्धयित्वा ताभिः सह वर्तामहे। सर्वेषां ज्येष्ठानां सेवा शुश्रूषा तु स्नुषायाः कर्तव्यमेव। सर्वदा पत्या सह प्रेम्णा आदरेण च वर्तेमहि। यदि सः सन्तप्तः तर्हि वयं शान्ताः भवेम। कालान्तरेण तस्य अपराधं सः जानात्येव। इदानीम् अस्माकं गृहे बहवः सेवकाः प्रत्यक्षरूपेण कार्यरताः न सन्ति किन्तु अस्मान् अनेकैः प्रकारैः सेवाप्रदानं कुर्वन्ति अनेके सेवकाः। तेषां प्रति अवश्यमेव प्रेम्णा आदरेण च वर्तेमहि। सौजन्यपूर्णं वर्तनं सर्वदा स्पृहणीयम्। अत्र महत्त्वपूर्णा सूचना अस्ति यत् वयं पत्युः गृहं समागताः। तत्र विशिष्टं स्थानं प्राप्तुम् इच्छा स्यात् तर्हि सर्वेषां प्रति प्रेमादरेण व्यवहर्तव्यम्। संयमेन विवेकबुद्ध्या च वर्तेरन्।

व्यक्तिस्वातन्त्र्ये यथा अधिकाराः तथैव कर्तव्यान्यपि समाविष्टानि। किं बहुना कर्तव्यपूर्तिं विना अधिकारस्य अस्तित्वमेव न सम्भवति। गृहे युवकानां तथैव ज्येष्ठानां व्यवहारोऽपि परस्परान् प्रति प्रेमादरयुक्तः स्यात्। परम्परया प्रतिगृहं सुसंस्काराणां तथा च परस्परविषयकं प्रेमादरस्य भावनायाः सङ्क्रमणं प्रसारणमेव आवश्यकम्।

पारिवारिकसम्बधानां महत्त्वं ज्ञात्वा परस्पराणां स्वीकारः व्यक्तिरूपेण कर्तव्यः। प्रेमादरममतानां महती आवश्यकता अस्माकं जीवने अस्ति इति ज्ञात्वा यदि वयं सर्वे वर्तेमहि तर्हि पारिवारिकसम्बन्धाः पुनरेकवारं सुदृढतया गृहे गृहे विलसिष्यन्ति इति विश्वासः।

एषा एव भारतीयसंस्कृतिः व्यष्टितः समष्टिपर्यन्ता।

**सौ. मृदुला अतुल तापस**

## प्रस्तावविषयः - 'मोदी-मन-की-बात'

अधुना नरेन्द्रमोदी भारतस्य प्रधानमन्त्री अस्ति। सः मनोगतमिति कश्चित् विशिष्टं कार्यक्रमं प्रकल्पितवान्। दूर-श्रवणयन्त्रमाध्यमेन प्रतिमासं अन्तिमे रविवासरे प्रसारयति च। कार्यक्रमोऽयं ३ आक्टोबर २०१४ दिने आरब्धः। तस्मिन् सः देशहिताय, जनानां सङ्क्षेमाय च यत्किञ्चित् कर्तुमिच्छति, प्रजाभ्यः यत् किञ्चित् ज्ञापयितुमिच्छति तत् निस्सङ्कोचं वदति। सम्पूर्णदेशे सर्वे जनाः अमुं महता आदरेण शृण्वन्ति, स्वकीयान् अभिप्रायान् च प्रधानमन्त्रिणं प्रति साक्षात् वदन्ति। परिपालयितारः, पालिताश्च द्वावपि सङ्गत्य राष्ट्रस्य प्रगत्यर्थं यतन्ते।

मनोगते विषयाः विभिन्नाः वर्तन्ते। सामाजिकाः, राजनीति-सम्बद्धाः, आर्थिकविषयाः च चर्च्यन्ते। कार्यक्रमोऽयं हिन्द्यां प्रथमं प्रसार्यते, ततश्च अष्टादशभारतीयभाषासु अनूद्यते, सायं प्रसार्यते च। प्रचलति मासे यद्यत् विशिष्टं सांस्कृतिकं वर्तते, तदधिकृत्यापि सः वक्ति। अस्य कार्यक्रमस्य लोकप्रियतां दृष्ट्वा आकाशवाणी-संस्था अस्य विदेशेष्वपि प्रसारणाय व्यवस्थां करोति। द्वयोः वर्षयोः तया संस्थया अस्य कारणेन उप-दशकोटि रूप्यकाणि अर्जितानि।

मोदी स्फुटवक्ता, स्ववाण्या जनान् अभिभावयति, स्वनामधन्यः सन् हृदयानि मोदयति। अनेन कार्यक्रमेण आकाशवाणीसंस्था पुनः जनादरं सम्प्राप्य जनैः मुदा आकर्ण्यते। अत्र २७ जनवरी २०१५ तमे दिने तदानींतनः अमेरिका-राष्ट्रपतिः अपि आगच्छत्। अद्यावधि चर्चिताः प्रमुख-विषया सन्ति - अनैतिकधनं, कृषकाणामभिवृद्धिः, मद्यपान-मादकद्रव्याणां सेवनविरोधः, स्वच्छभारताभियान-कार्यक्रमः, छात्राणां प्रोत्साहनं, पर्वदिनानां शुभकामनाः, तदा तदा क्रीडाकारैः अन्यैः वा प्राप्तानां विजयानाम् अभिनन्दनं, इत्यादिकम्।

पूर्वं केनचिदपि प्रधानमन्त्रिणा अन्येन राजनीतिज्ञेन वा एतादृशः प्रयत्नः न कृतः। प्रजाभ्यः एतत् प्रयतनं बहुधा रोचते। ते अस्मै कार्यक्रमाय प्रधानमन्त्रिणं प्रति लेखवान् लिखन्ति, स्वोद्देशान् ज्ञापयन्ति च। अनेन शासकैः सह साक्षात् सम्बन्धः संस्थापितः इति सन्तुष्टिरपि भवति जनमानसेषु।

● उषाराणी सङ्का

☺☺☺☺☺☺☺☺☺☺

महिला - मम स्मरणशक्तिः अत्यधिका क्षीणा भवति।
स्नेहिता - पुनः वदतु। का क्षीणा भवति?
महिला - का क्षीणा भवति इति विस्मृतवती।

- वसन्तश्यामलाम्

## अग्रे सरन्ति

कः कथयति यत् पुष्पाणि विकसन्ति।
पुष्पाणि तु तान्येव यानि विकसितानि।

अविकसिताः कलिकाः
न कोऽपि
पुष्पाणि कथयति।
वस्तुतस्तु पुष्पाणि म्लायन्ति।
समयस्य जगतश्च
दाहेन दग्ध्वा
पत्राणि शाखाश्च
प्रपतन्ति।
आम्! कलिकाः विकसन्ति
पुष्पाणि म्लायन्ति।
म्लायन्ति पुष्पाणि दृष्ट्वा
क्षणमेकं तिष्ठति जनाः।
केचित् दयां दर्शयन्ति,
केचित् किञ्चित् किञ्चित् स्मितं कुर्वन्ति।
तदनन्तरं पादाभ्यां विदीर्य विदीर्य
अग्रे सरन्ति।

● डॉ. कुसुम पटोरिया

## सान्वय-सुभाषितसङ्ग्रहः

**किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकम्**
**स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे।**
**चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने**
**किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मि प्रभो॥**

**अन्वयः** - किं तव ज्योतिः। मे अहनि भानुमान् रात्रौ (च) प्रदीपादिकम्। स्यात् एवं। रविदीपदर्शनविधौ किं ज्योतिः मे आख्याहि। चक्षुः। तस्य निमीलनादिसमये किं (ज्योतिः)। धीः। धियः दर्शने किं (ज्योतिः)। तत्र अहम्। अतः भवान् परमकं ज्योतिः। तत् अस्मि प्रभो।

**एका भार्या प्रकृतिरचला चञ्चला च द्वितीया**
**एकः पुत्रो त्रिभुवनजयी मन्मथो दुर्निरीक्ष्यः।**
**शेषश्शय्या जलधिशयनं वाहनं पन्नगारिः**
**स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः॥**

**अन्वयः** - एका भार्या प्रकृतिः (सा) अचला। द्वितीया (भार्या) चञ्चला (लक्ष्मी) च। एकः पुत्रः त्रिभुवनजयी मन्मथः (परन्तु) दुर्निरीक्ष्यः। शेषश्शय्या जलधिशयनं (तस्य)। वाहनं पन्नग अरिः। (इत्थम्) स्वगृहचरितं स्मारं स्मारं मुरारिः दारुभूतः (अभवत्)॥

● सङ्ग्राहकः - के. एन्. रमेशः

संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।